Shri Raghunath Temple MSS. Library,
JAMMU

No. १३०४

Title निर्विकल्प विचार:

Author ×

Extent २ Age ×

Subject न्यायवैशेषिकं

© Dharmartha Trust JK. Digitized by eGangotri

निर्विकल्पविचारः

२३०५

© Dharmartha Trust JK. Digitized by eGangotri

निर्विकल्पविचार पत्रे २

© Dharmartha Trust JK. Digitized by eGangotri

निर्वि॰वा॰

ॐ श्री गणेशाय नमः ॥ ननु निर्विकल्पकज्ञानस्य [illegible] कृतोऽतीन्द्रियत्वाभ्युपगमः ॥ विनिगमनाविरहेण नि
प्रकारकज्ञानत्वं निर्विशेषणकज्ञानत्वं निःसंस[illegible]र्गकज्ञानत्वे मिश्रमिर्च्छमैमानसत्वावच्छिन्नं प्रतिप्रतिबंधकत्वप
१ कल्पनामपेक्ष्यतेंद्रियकत्वनाभ्युपगमस्यैव युक्तत्वात् ॥ न च निर्विकल्पकस्येंद्रियकत्वे तदनुव्यवसायापत्तिरिति
वाच्यम् ॥ यत्रादौ निर्विकल्पकं ततो विशिष्टबुद्धिस्तत्र विशिष्टबुद्ध्यनुव्यवसाये उत्पत्तिकाले निर्विकल्पक
स्याप्यनुव्यवसाये इष्टापत्तेः ॥ तत्र घटं साक्षात्करोमीत्याद्यनुव्यवसाये निर्विकल्पकस्यापि विषयत्वाभावस्य
प्राप्पानिर्णीयत्वात् ॥ नन्वेवमपि यत्र विनश्यदवस्थेंद्रियसंनिकर्षजन्यं निर्विकल्पकं ततो विशिष्टप्रत्य
क्षं तत्रापि निर्विकल्पकस्याप्यनुव्यवसायापत्तिर्दुर्वारेति वाच्यम् ॥ विषयविशेष्यताविषयकज्ञानादिप्रत्य
क्षस्यालीकत्वात् अविद्यमानसामग्रीविरहादेव निर्विकल्पकस्याप्यनुव्यवसायानुदयात् ॥ किंचान्ये

© Dharmartha Trust JK. Digitized by eGangotri

विकल्पकस्याप्रसक्तितया विषयभासकसामग्रीविरहाद्धि नष्टघटत्वस्य संनिकर्षजन्यनिर्विकल्पके माना
भावाच्च ॥ न चैतथापि घटत्वादिनिर्विकल्पकानन्तरं घटत्वादिसमवेतप्रत्यक्षोत्पत्तिप्रसङ्ग एव
घटत्वादिनिर्विकल्पकस्य साक्षात्कारोत्पत्तिः विषयभासकलौकिकसन्निकर्षादिति वाच्यम् ॥ इष्टत्वात् ॥
द्वे एवितेव स्वप्रापयप निर्दोषत्वात् ॥ घटत्वभेदत्वादिज्ञानजनकज्ञाने विषयस्य चक्षुःसंयोगादेरि
वोपनयमर्यादया घटत्वादेरपि निर्विकल्पकेऽवश्यंभावेनेच्छाद्वेषवद्घटत्वादेरपि सविकल्पकमा
त्रवेद्यत्वाच्च ॥ विनष्टघटत्वस्य ज्ञानजन्यघटत्वादौ मानाभावात् नियमतः ॥ कृतित्वनिर्विकल्पकस्व
विषयत्वेऽतः कल्पनेन कृतेरपि सविकल्पकमात्रवेद्यत्वात् ॥ विशेषणग्रहणे प्रधानेनैवात्मनो
मानसनियमेऽस्मन्मनोमिलिततथात्वादिति चेन्नैवम् ॥ अयं घट इति प्रत्यक्षात्मकविशिष्टप्रत्य

© Dharmartha Trust JK. Digitized by eGangotri

निर्वि. वा.

२

2

ज्ञानं न रं घटत्वेनेदं साक्षात्करोमीत्येवानुव्यवसायोत्पत्त्यातन्निर्विकल्पकमानस्यवक्तुमशक्यत्वात् प्रका
रस्य प्रतीयापत्तेः ॥ विषयतासामान्यस्य प्रतीयापार्थत्वे ऽनेनेन घटत्वं साक्षात्करोमित्यसमवायेनेदंसा
क्षात्करोमीत्यनुव्यवसायापत्तेः ॥ न तत्त्वेमानस्यत्वावच्छिन्नं प्रति निनिगमनाविरहात् निष्प्रकारज्ञानत्वा
दिना प्रतिबध्यप्रतिबंधकभावकल्पनायां विन दोषाप्यसामञ्जस्यकत्वात् ॥ अनुपपत्तिगुरुत्वादेरप्यतं
द्रिपत्वविलोपापत्तेरितिसंक्षेपः ॥ इति श्रीमहामहोपाध्यायविरचितं निर्विकल्पविचाररहस्यं समाप्तम्
गात्र ॥ संवत् १९१८ .. शि. श्री . श्री ॥

२